श्री आद्या स्तोत्रं

श्री आद्या स्तोत्रं

ब्रह्मोवाच |
शृणु वत्स प्रवक्ष्यामि आद्यास्तोत्रं महाफलं |
यः पठेत् सततं भक्त्या स एव विष्णुवल्लभः || 1 ||

मृत्युर्व्याधिभयं तस्य नास्ति किंचित् कलौ युगे |
अपुत्रा लभते पुत्रं त्रिपक्षं श्रवणं यदि || 2 ||

द्वौ मासौ बंधनान्मुक्ति विप्रवक्त्रात् श्रुतं यदि |
मृतवत्सा जीववत्सा षण्मासं श्रवणं यदि || 3 ||

नौकायां संकटे युद्धे पठनाज्जयमाप्नुयात् |
लिखित्वा स्थापयेद्गेहे नाग्निचौरभयं क्वचित् || 4 ||

राजस्थाने जयी नित्यं प्रसन्नाः सर्वदेवता |
ॐ ह्रीं |
ब्रह्माणी ब्रह्मलोके च वैकुंठे सर्वमंगळा || 5 ||

इंद्राणी अमरावत्यामंबिका वरुणालये |
यमालये कालरूपा कुबेरभवने शुभा || 6 ||

महानंदाग्निकोणे च वायव्यां मृगवाहिनी |
नैर्ऋत्यां रक्तदंता च ऐशान्यां शूलधारिणी || 7 ||

पाताळे वैष्णवीरूपा सिंहले देवमोहिनी |
सुरसा च मणिद्विपे लंकायां भद्रकाळिका || 8 ||

रामेश्वरी सेतुबंधे विमला पुरुषोत्तमे |
विरजा औड्रदेशे च कामाक्ष्या नीलपर्वते || 9 ||

काळिका वंगदेशे च अयोध्यायां महेश्वरी |
वाराणस्यामन्नपूर्णा गयाक्षेत्रे गयेश्वरी || 10 ||

कुरुक्षेत्रे भद्रकाळी व्रजे कात्यायनी परा |
द्वारकायां महामाया मथुरायां महेश्वरी || 11 ||

क्षुधा त्वं सर्वभूतानां वेला त्वं सागरस्य च |
नवमी शुक्लपक्षस्य कृष्णस्यैकादशी परा || 12 ||

दक्षसा दुहिता देवी दक्षयज्ञविनाशिनी |
रामस्य जानकी त्वं हि रावणध्वंसकारिणी || 13 ||

चंडमुंडवधे देवी रक्तबीजविनाशिनी |
निशुंभशुंभमथिनी मधुकैटभघातिनी || 14 ||

विष्णुभक्तिप्रदा दुर्गा सुखदा मोक्षदा सदा |
आद्यास्तवमिमं पुण्यं यः पठेत् सततं नरः || 15 ||

सर्वज्वरभयं न स्यात् सर्वव्याधिविनाशनं |
कोटितीर्थफलं तस्य लभते नात्र संशयः || 16 ||

जया मे चाग्रतः पातु विजया पातु पृष्ठतः |
नारायणी शीर्षदेशे सर्वांगे सिंहवाहिनी || 17 ||

शिवदूती उग्रचंडा प्रत्यंगे परमेश्वरी |
विशालाक्षी महामाया कौमारी शंखिनी शिवा || 18 ||

चक्रिणी जयदात्री च रणमत्ता रणप्रिया |
दुर्गा जयंती काळी च भद्रकाळी महोदरी || 19 ||

नारसिंही च वाराही सिद्धिदात्री सुखप्रदा |
भयंकरी महारौद्री महाभयविनाशिनी || 20 ||

इति श्रीब्रह्मयामले ब्रह्मनारदसंवादे श्री आद्या स्तोत्रं ||